श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैः अनुगृहीता

# ॥ श्री देहळीशस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री देहळीशस्तुतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

विक्रम्य येन विजितानि जगन्ति भूम्ना
विश्वस्य यं परमकारणमामनन्ति ।
विश्राणयन् प्रणयिनां विविधान् पुमर्थान्
गोप्ता स मे भवतु गोपपुराधिराजः ॥ 1 ॥

देहळ्यधीश्वर तवेदृशमीश्वरत्वं
तुष्टूषतां दिशति गद्गदिकानुबन्धम् ।
वाचालयत्यथ च मां क्वचन क्षपायां
क्षान्तेन दान्तकविमुख्यविमर्दनेन ॥ 2 ॥

त्वच्चक्रवद्द्रुतमनेहसि घूर्णमाने
निम्नोन्नतक्रमनिदर्शितनेमिवृत्ताः ।
आराध्य गोपनगरे कृपयोदितं त्वां
स्वाराज्यमग्र्यमलभन्त सुरासुरेन्द्राः ॥ 3 ॥

आकल्पपुष्पसुभगोन्नतबाहुशाखः
पादे सदा परिपचेळिमसत्फलस्त्वम् ।
पण्णातटस्पृशि मृकण्डुतपोवनेऽस्मिन्
छायानिलीनभुवनोऽसि तमालशाखी ॥ 4 ॥

चक्रस्य दैत्यदनुजादिषु वामभावं
    शङ्खस्य चाश्रितजनेष्वपि दक्षिणत्वम्।
व्यक्तं प्रदर्शयसि गोपपुराधिराज
    व्यत्यस्य नूनमनयोः करसम्प्रयोगम्॥ 5॥

दीपेन केनचिदशीतरुचा निशीथे
    स्नेहोपपन्नपरिशुद्धगुणार्पितेन।
दह्लावकाशनिबिडं ददृशुर्भवन्तं
    स्वाध्याययोगनयनाः शुचयः कवीन्द्राः॥ 6॥

कासारपूर्वकविमुख्यविमर्दजन्मा पण्णातटेक्षुसुभगस्य रसो बहुस्ते।
त्वत्पादपद्ममधुनि त्वदनन्यभोग्ये नूनं समाश्रयति नूतनशर्करात्वम्॥ 7॥

वैरोचनेः सदसि वामनभूमिकावान्
    विक्रान्तिताण्डवरसेन विजृम्भमाणः।
चक्रे भवान् मकरकुण्डलकर्णपाशः
    श्यामैकमेघभरितामिव सप्तलोकीम्॥ 8॥

चित्रं न तत् त्रिषु मितानि पदेषु यत् ते
    विश्वान्यमूनि भुवनानि विशङ्कटेषु।
भक्तैः समं क्वचिदसौ भवनैकदेशे
    माति स्म मूर्तिरमिता तदिहाद्भुतं नः॥ 9॥

भक्तप्रिय त्वयि तथा परिवर्धमाने
    मुक्तावितानविततिस्तव पूर्वमासीत्।
हारावळिः परमथो रशनाकलापः
    तारागणस्तदनु मौक्तिकनूपुरश्रीः॥ 10॥

भिक्षोचितं प्रकटयन् प्रथमाश्रमं त्वं
    कृष्णाजिनं यवनिकां कृतवान् प्रियायाः।

व्यक्ताकृतेस्तव समीक्ष्य भुजान्तरे तां
    त्वामेव गोपनगरीश जना विदुस्त्वाम्॥ **11** ॥

सत्कुर्वतां तव पदं चतुराननत्वं
    पादोदकं च शिरसा वहतां शिवत्वम्।
एकत्र विक्रमणकर्मणि तद् द्वयं ते
    देहल्यधीश युगपत् प्रथितं पृथिव्याम्॥ **12** ॥

भक्तोपरोधसह पादसरोजतस्ते
    मन्दाकिनी विगळिता मकरन्दधारा।
सद्यस्त्रिवर्गमपवर्गमपि क्षरन्ती
    पुण्या बभूव पुरशासनमौळिमाला॥ **13** ॥

विक्रान्तिकेतुपटिका पदवाहिनी ते
    न्यञ्चन्त्युपैति नतजीवित शिंशुमारम्।
औत्तानपादिममृतांशुमशीतभानुं
    हेमाचलं पशुपतिं हिमवन्तमुर्वीम्॥ **14** ॥

वेधःकमण्डलुजलैर्विहितार्चनं ते
    पादाम्बुजं प्रतिदिनं प्रतिपद्यमाना।
स्तोत्रप्रिय त्रिपथगादिसरिद्वराणां
    पण्णा बभूव भुवने बहुमानपात्रम्॥ **15** ॥

स्वच्छन्दविक्रमसमुन्नमितादमुष्मात्
    स्रोतस्त्रयं यदभवत् तव पाद पद्मात्।
वेताळभूतसरसामपदिश्य वाचं
    प्रायेण तत् प्रसवभूमिमवाप भूयः॥ **16** ॥

क्रीडापरेण भवता विहितोपरोधान्
    आराधकाननुपरोधमुदञ्चयिष्यन्।

ताम्रेण पादनखरेण तदाऽण्डमध्ये
    घण्टापथं कमपि नूनमवर्तयस्त्वम्॥ **17** ॥

कामाविलेऽपि करुणार्णवबिन्दुरेकः
    क्षिप्तः स्वकेळितरसा तव देहळीश।
तत्सन्ततेरुभयथा वितितिं भजन्त्याः
    संसारदावदहनं शमयत्यशेषम्॥ **18** ॥

नीडोदरान्निपतितस्य शुकार्भकस्य
    त्राणेन नाथ विहरन्निव सार्वभौमः।
आदाय गोपनगराधिपते स्वयं मां
    क्रीडादयाव्यतिकरेण कृतार्थय त्वम्॥ **19** ॥

लीलाशकुन्तमिव मां स्वपदोपलब्ध्यै
    स्वैरं क्षिपन् दुरितपञ्जरतो गुणस्थम्।
तत्तादृशं कमपि गोपपुरीविहारिन्
    सन्तोषमुल्लळय सागरसम्भवायाः॥ **20** ॥

वातूलकल्पवृजिनप्रभवैर्मदीयां
    वैयाकुलीं विषयसिन्धुतरङ्गभङ्गैः।
दासोपमर्दसह दुर्निरसां त्वदन्यैः
    अन्वीक्ष्य गाढमनुकम्पितुमर्हसि त्वम्॥ **21** ॥

एनस्विनीमिति सदा मयि जायमानां
    देहळ्यधीश दृषदोऽपि विलापयन्तीम्।
नाथे समग्रशकने त्वयि जागरूके
    किं ते सहेत करुणा करुणामवस्थाम्॥ **22** ॥

आत्मोन्नतिं परनिकर्षमपीह वाञ्छन् निम्ने विमोहजलधौ निपतामि भूयः।
तन्मामुदञ्चय तवोन्नतपाददघ्नं देहळ्यधीश गुणितेन दयागुणेन॥ **23** ॥

अक्षीणकल्मषरसोऽपि तवानृशंस्यात्
लक्ष्मीसमक्षमपि विज्ञपयाम्यभीतः।
भक्तोपमर्दरसिक स्वयमल्पबुद्धेः
यन्मन्यसे मम हितं तदुपाददीथाः॥ **24**॥

मन्ये दयार्द्रहृदयेन महाधनं मे
दत्तं त्वयेदमनपायमकिञ्चनत्वम्।
येन स्तनन्धयमिव स्वहितानभिज्ञं
न्यासीकरोषि निजपादसरोरुहे माम्॥ **25**॥

दुर्वारतीव्रदुरितप्रतिवावदूकैः
औदार्यवद्भिरनघस्मितदर्शनीयैः।
देहळ्यधीश्वर दयाभरितैरपाङ्गैः
वाचं विनाऽपि वदसीव मयि प्रसादम्॥ **26**॥

अयमनवमसूक्तैरादिभक्तैर्यथावत्
विशदितनिजतत्त्वो विश्वमव्यादभव्यात्।
रथचरणनिरूढव्यञ्जनानां जनानां
दुरितमथनलीलादोहळी देहळीशः॥ **27**॥

इयमवितथवर्णा वर्णनीयस्वभावात्
विदितनिगमसीम्ना वेङ्कटेशेन गीता।
भवमरुभुवि तृष्णालोभपर्याकुलानां
दिशतु फलमभीष्टं देहळीशस्तुतिर्नः॥ **28**॥

॥ इति श्री देहळीशस्तुतिः समाप्ता॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥